३१अ० तस्यापत्यम् अण्। कार्त्तवीर्य्य तदपत्ये कार्त्त-वीर्य्यशब्दे विवृतिः "गर्भस्य सम्भवतः पूर्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्दे हेन्द्रियाणां, हृदयमिति कृतवीर्य्यः बुद्धेर्मनसश्च स्थानत्वात्" सुश्रुतः। २वीर्य्यान्विते त्रि०।

**कृतवेतन** त्रि० कृतं वेतनं यस्य। "योयावत् कुरुते कार्य्यं तावत्तस्येह वेतनम्" या० उक्तरीत्या कृतमर्य्यादिके दासे। "प्रमाददुष्टनष्टांश्च प्रदाप्यः कृतवेतनः" या०स्मृ०

**कृतवेदिन्** त्रि० कृतं वेत्ति विद–णिनि। कृतोपकारस्योप कारके स्त्रियां ङीप् [रत्नमा०

**कृतवेध(क)** पु० कृतो वेधोऽस्य वा कप्। श्वेतकोषातक्यां

**कृतवेधना** स्त्री कृतं वेधनं यस्याः। कोषातकीलतायाम् राजनि० [शिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे" या०

**कृतशिल्प** पु० कृतमभ्यस्तं शिल्पं येन। अभ्यस्तशिल्पे "कृत-

**कृतश्रम** त्रि० कृतः श्रमो येन। महोत्साहान्विते। "पौरा-णिकः पुराणे कृतश्रमः" भा० आ० ८५श्लो०। २धर्म्म राजसभ्ये ऋषिभेदे 'बलीवाकः शिलीवाकः सत्यपालः कृतश्रमः', भा० स० ४अ० यमसभ्योक्तौ

**कृतसंज्ञ** त्रि० कृता संज्ञा संङ्केतो यस्मै। कृतसङ्केते दासादौ "गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः" मनुः २कृतचैतन्ये नरेणाकृतसंज्ञेन विशुद्धेनान्तरात्मना" भा० आश्व० ५अ०। कृतसंङ्केतादयोऽप्यत्र "नामसमेतं कृतसङ्केतम्" जयदेवः

**कृतसापत्निका** स्त्री कृतं सापत्न्यं यस्याः कप् टापि अत इत्त्वे यलोपः। अध्यूढायां स्त्रियां यस्या विवा-हात् पश्चात् तत्पतिना विवाहान्तरं कृतं तस्याम् अमरः

**कृतस्वर** पु० कृतः स्वरः शब्द उपतापो वा येन यत्र वा। स्वर्णोत्पत्तिस्थाने स्वर्णाकरे कार्त्तस्वरः २कृतशब्दे त्रि०

**कृतहस्त** त्रि० कृतः अभ्यस्तः हस्तो वाणादित्यागमोक्षणला-घवरूपा हस्तशिक्षा येन। सुशिक्षितशरविद्ये जने अमरः "अप्राप्तांश्चैव तान् (शरान्) पार्थश्चिच्छेद कृत हस्तवत्" भा०वि०१८७६श्लो०"अप्राप्तांश्चैव तान् वाणान् चिच्छेद कृतहस्तवद्" हरिवं०१८२०५श्लो०

**कृताकृत** न० कृतं कार्य्यञ्च अकृतं कारणं च समा० द्व०। १कार्य्यकारणयोः। "क्तेन नञ्विशिष्टेनानञ्" पा० कर्म्म०। कृते अकृते च २होमादौ। ऋत्विग्विशेषस्य ब्रह्मणः कृताकृतावेक्षणाय होमादौ वरणम् क्रियते इति याज्ञिक-सम्प्रदायः। ३कृतशब्दोक्ते कात्यायनपरिभाषिते लड्डु-कादौ कार्य्यकारणरूपे ४परमेश्वरे पु० "लोकाध्यक्षः सुराध्यक्षः ऋतधर्म्मा कृताकृतः" विष्णुसं० "कृतस्य कार्य्यरूपेण, अकृतस्य कारणरूपेणेति कृताकृतः" भा०। भावे क्त कृतं करणम् अकृतमकरणं द्वन्द्व०। ५कर-णाकरणयोः न० द्विव०। "नैनं कृताकृते तपतः" शत० ब्रा०१४।७।२।२७। कृतञ्चाकृतञ्च। ६किञ्चित्कृते किञ्चिदकृते च "कृताकृतञ्च कनकं हस्तिनश्चाचलोपमाः" भा०आनु० ५२अ० "कृताकृतांस्तण्डुलांश्च पललौदनमेव च" या० स्मृ०

**कृतागम** पु० कृत आगमोयेन। १परमेश्वरे वेदशास्त्र कर्तृत्वात्तस्य तथात्वम्। "कृतकर्म्मा कृतागमः" विष्णुसं० कृतोवेदात्मकआगमोयेनेति कृतागमः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदश्च" इति श्रुतेः" भा० "कामः कान्तः कृतागमः" विष्णुसं०

**कृताग्नि** पु० कृतवीर्य्यानुजभ्रातरि। कृतवीर्य्यशब्दे विवृतिः

**कृताङ्क** पु० कृतसंख्यकश्चतुःसंख्यकोऽङ्कोयत्र। चतुःसंख्या-न्विते पाशकभेदे [ लुब्धे २संपुटीकृतहस्ते त्रि० भरणिः

**कृताञ्जलि** पु० कृतोऽञ्जलिरिव पत्रसङ्कोचो येन। १लज्जा-

**कृतात्मन्** पु० कृतः शिक्षितः संस्कृतो वा आत्माऽन्तःकरणं यस्य। १शिक्षितचित्ते, २शुद्धान्तःकरणे च। "स्वर्गे स्वर्गवतां नित्यमागच्छन्ति कृतात्मनाम्" "उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः" मनुः "पर्य्याप्तकामस्य कृता-त्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः"

**कृतात्यय** पु० कृतस्य कर्म्मजन्यभोगस्यात्ययोऽवसानम्। भोगं विना कृतकर्म्मनाशे 'कृतात्ययेऽनुशयवान्' शा०सू०

**कृतानुकृत** न० कृतस्यानुकृतमनुकरणम्। कृतप्रतिकृतौ कृतताडनादेस्ताडने "तौ जघ्नतुस्तदान्योन्यं कृतानुकृत-कारिणौ" रामा० "कृतानुकारकृतप्रतिकृत्यादयोऽप्यत्र

**कृतान्त** पु० कृतः अन्तो विपर्य्ययनाशो–निश्चयो विषयपरि-च्छेदो वा येन। १सिद्धान्ते। "कृतो नाशो येन। २दैवमाते ३पापे ४यमे च। ५पूर्व्वदेहजन्ये फलोन्मुखे ६दैवे अमरः ७शनौ ८तद्वारे च शब्दचि० "कृता-न्तकुजयोर्वारे यस्य जन्मदिनं भवेत्" ति०त० ज्यो० ९यम-दैवत्ये भरणीनक्षत्रे लक्षितलक्षणया १०द्वित्वसंख्यायाञ्च

**कृतान्तजनक** पु०६त०। सूर्य्ये हेमच० कृतान्तो जनको-यस्याः कालागुरुणि रेणुकागन्धद्रव्ये स्त्री शब्दच०

**कृतान्न** न० कृतं पक्वं तदन्नञ्च। लड्डुकादौ पक्वान्ने,'कृ-तान्नमुदकं स्त्रियः" इति अविभाज्ये स्मृतिः। प्राक्कान्य